# Shri Viraraghavaprapattih

# શ્રીવીરરાઘવપ્રપત્તિઃ

## Document Information

Text title : Shri Viraraghavaprapattih

File name : vIrarAghavaprapattiH.itx

Category : raama, prapatti

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 13, 2020

*sanskritdocuments.org*

# શ્રીવીરરાઘવપ્રપત્તિઃ

શ્રીધર્મસેનનૃપરમ્યસુતાસમેતં
શ્રીભૂસહાયમમલં શ્રિતપારિજાતમ્ ।
શ્રીશેષભોગશયનેઽતિસુખં શયાનં
શ્રીવીરરાઘવમહં શરણં પ્રપદ્યે ॥ ૧॥

હૃત્તાપનાશનસરોત્તરતીરવાસં
હૃત્પુણ્ડરીકકુહરે સમસન્નિવિષ્ટમ્ ।
શ્રીશાલિહોત્રમુનિપુઙ્ગવસેવ્યમાનં
શ્રીવીરરાઘવમહં શરણં પ્રપદ્યે ॥ ૨॥

વીક્ષાટવીવિહરણક્ષમપાદપદ્મં
વેદ્યં સદા વિજયકોટિવિમાનસેવ્યમ્ ।
વિશ્વમ્ભરં વિધિશિવેન્દ્રનિષેવ્યમાણં
શ્રીવીરરાઘવમહં શરણં પ્રપદ્યે ॥ ૩॥

સસ્નેહભક્તિભયભૂકમલાકરાબ્જ
સંવાહ્યમાનચરણં સરસીરુહાક્ષમ્ ।
સૌમ્યં સમસ્તજગદેકનિવાસભૂતં
શ્રીવીરરાઘવમહં શરણં પ્રપદ્યે ॥ ૪॥

પદ્મોપમાનપદપાણિવિલોચનાઢ્યં
પદ્માનિવાસગૃહબાહુયુગાન્તરાલમ્ ।
પદ્માસનાયુતનિકેતનપદ્મનાભં
શ્રીવીરરાઘવમહં શરણં પ્રપદ્યે ॥ ૫॥

આરોગ્યપુત્રવિલસત્કવિનાગ્જનૈક
રાજ્યાધિપત્યવરદાનનિવાદદીક્ષમ્ ।
મોક્ષપ્રદં સ્વપદવન્દકવૈષ્ણવાનાં
શ્રીવીરરાઘવમહં શરણં પ્રપદ્યે ॥ ૬॥

મધ્યેશિખં સુરવરૈઃ પરમૈરશેષૈ-
રાર્યોપચિત્તવિભવૈરતિશુદ્ધસત્ત્વૈઃ ।
અપ્રાકૃતૈરતિસમશ્રિતપાદપદ્મં
શ્રીવીરરાઘવમહં શરણં પ્રપદ્યે ॥ ૭॥

રામાનુજાર્યમુખપદ્મસહસ્રભાનું
પૂર્ણાર્યવર્યનયનોત્પલપૂર્ણચન્દ્રમ્ ।
શ્રીયામુનાર્યહૃદયામ્બુજચઞ્ચરીકં
શ્રીવીરરાઘવમહં શરણં પ્રપદ્યે ॥ ૮॥

શ્રીરામમિશ્રકમલાક્ષવરાર્થનાથ-
યોગીન્દ્રતીર્થવિભવં શઠકોપવન્ધ્યમ્ ।
શય્યાસુ સાગરસુતાપરિચર્યમાણં
શ્રીવીરરાઘવમહં શરણં પ્રપદ્યે ॥ ૯॥

શ્રીમચ્છઠારિપરકાલયતીન્દ્રમુખ્યૈ-
ર્દિવ્યપ્રબન્ધનિવહૈરનુબધ્યમાનમ્ ।
પૂર્વૈઃ સદા ગુરુવરૈઃ પ્રથિતાનુભાવૈઃ
શ્રીવીરરાઘવમહં શરણં પ્રપદ્યે ॥ ૧૦॥

હૃત્તઃ સદાનુ પરમં પરિશુદ્ધદિવ્યં
દુગ્ધામ્બુધિં સકલસંશ્રિતરક્ષણાઢ્યમ્ ।
હૃત્તાપનાશનતટીરતયાવસાનં
શ્રીવીરરાઘવમહં શરણં પ્રપદ્યે ॥ ૧૧॥

સૌમ્યોપયન્તૃમુનિના કરુણાવિરક્તિ
ધીભક્તિશાન્તિમુખસદ્ગુણસાગરેણ ।
સંસેવ્યમાનચરણં જગતાં શરણ્યં
શ્રીવીરરાઘવમહં શરણમ્પ્રપદ્યે ॥ ૧૨॥

ઇતિ શ્રીવીરરાઘવપ્રપત્તિઃ સમ્પૂર્ણા ।

Proofread by Aruna Narayanan

*Shri Viraraghavaprapattih*

pdf was typeset on September 13, 2020

Please send corrections to *sanskrit@cheerful.com*